শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদান্ধ্রপূর্ণগুরুভিরনুগৃহীতং

# ॥ শ্রীযতিরাজমঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীযতিরাজমঙ্গলম্ ॥

শ্রীপরাঙ্কুশপাদাব্জ সুরভীকৃত মৌলযে।
শ্রীৱৎসচিহ্ননাথায যতিরাজায মঙ্গলম্॥ **1** ॥

নাথপদ্মাক্ষরামার্যপাদপঙ্কজ সেৱিনে।
সেৱ্যায সর্ৱযমিনাং যতিরাজায মঙ্গলম্॥ **2** ॥

পূর্ণার্যপূর্ণকরুণাপাত্রাযামিততেজসে।
মালাধরপ্রিযাযাস্তু যতিরাজায মঙ্গলম্॥ **3** ॥

সংসেৱ্য যামুনাচার্যং একলৱ্যোস্ম্যহং গুরোঃ।
ইত্যেৱং ৱদতে নিত্যং যতিরাজায মঙ্গলম্॥ **4** ॥

শ্রীকাঞ্চীপূর্ণমিশ্রোক্ত রহস্যার্থৱিদে সদা।
দেৱরাজপ্রিযাযাস্তু যতিরাজায মঙ্গলম্॥ **5** ॥

শ্রীমদ্ গোষ্ঠীপুরীপূর্ণদিৱ্যাজ্ঞাং কুর্ৱতে মুদা।
শ্লোকার্থং গৃহ্ণতে তস্মাৎ যতিরাজায মঙ্গলম্॥ **6** ॥

কূরেশকুরুকানাথদাশরথ্যাদিদেশিকাঃ।
যচ্ছিষ্যা ভান্তি তে তস্মৈ যতিরাজায মঙ্গলম্॥ **7** ॥

চরমশ্লোকতত্ত্বার্থং জ্ঞাৎৱার্যাজ্ঞাং ৱিলঙ্ঘ্য চ।
দিশতে তং স্বকীযেভ্যঃ যতিরাজায মঙ্গলম্॥ **8** ॥

শ্রীশৈলপূর্ণকৃপযা শ্রীরামাযণমর্থতঃ।
ভক্ত্যা যেন শ্রুতং তস্মৈ যতিরাজায মঙ্গলম্॥ **9** ॥

শঙ্করাদিকুদৃষ্টীনাং বাহ্যানাং নিধনায চ।
শ্রীভাষ্যং কুর্ৱতে তস্মৈ যতিরাজায মঙ্গলম্॥ **10** ॥

কুর্ৱন্নুপনিষদ্ভাষ্যং জগদ্রক্ষাং করোতি যঃ।
দযাযাঃ পরতন্ত্রায ভাষ্যকারায মঙ্গলম্॥ **11** ॥

দ্রমিডোপনিষদ্ব্যাখ্যাং কালযেতি কৃপাবলাৎ।
শাসতে কুরুকেশং তং ভাষ্যকারায মঙ্গলম্॥ **12** ॥

গৎৱা তু শারদাপীঠং ৱৃত্তিং বোধাযনস্য চ।
অৱলোক্যাগতাযাস্তু ভাষ্যকারায মঙ্গলম্॥ **13** ॥

পরমাণুমৃষাৱাদিৱাদিসংহারকারিণে।
তস্মৈ ভগৱতে শ্রীমদ্ভাষ্যকারায মঙ্গলম্॥ **14** ॥

শ্রীমৎকুরঙ্গপূর্ণায শ্রীভাষ্যং ৱদতে স্ৱযম্।
পিত্রে সংপৎসুতস্যাপি ভাষ্যকারায মঙ্গলম্॥ **15** ॥

দৎৱা ৱৃষগিরীশস্য শঙ্খচক্রে রমাপতেঃ।
পরমপ্রীতিযুক্তায ভাষ্যকারায মঙ্গলম্॥ **16** ॥

সন্যাসং কুর্ৱতে কাঞ্চ্যাং অনন্তসরসীতটে।
ৱরদে ন্যস্তভারায ভাষ্যকারায মঙ্গলম্॥ **17** ॥

শ্রীমন্মহাভূতপুরে শ্রীমৎকেশৱযজ্ৱনঃ।
কান্তিমত্যাং প্রসূতায যতিরাজায মঙ্গলম্॥ **18** ॥

শেষো ৱা সৈন্যনাথো ৱা শ্রীপতির্ৱেতি সাৎৱিকৈঃ।
ৱিতর্ক্যায মহাপ্রাজ্ঞৈঃ যতিরাজায মঙ্গলম্॥ **19** ॥

প্রকৃষ্টগুণপূর্ণায প্রাপ্যায স্ৱাঙ্ঘ্রিসেৱিনাম্।
প্রপন্নসার্থৱাহায যতিরাজায মঙ্গলম্॥ **20** ॥

ৱেদাত্মকপ্রমাণেন সাৎৱিকৈশ্চ প্রমাতৃভিঃ।
প্রমেযেণ সহ শ্রীমান্ ৱর্ধতাং যতিশেখরঃ॥ **21** ॥

॥ ইতি শ্রীযতিরাজমঙ্গলং সমাপ্তম্॥